In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीः ॥

॥ कामिकागमः ॥

पूर्वभागः

—○—

॥ तन्त्रावतारपटलः ॥

कैलासदक्षिणे शृङ्गे नानाश्चर्यसमन्विते ।
प्रवृद्धवटवृक्षोत्थच्छायाच्छन्नेऽतिविस्तृते ॥

व्याघ्रचर्मपरीधाने पीठे रत्नोपशोभिते ।
देवदानवगन्धर्वसिद्धविद्याधरादिभिः ॥

सेव्यमानं महादेवं श्रीकण्ठं विश्वनायकम् ।
कौशिकः काश्यपोऽगस्त्यो गौतमो नारदस्तथा ॥

सनत्कुमारस्सनकस्सनातनसनन्दनौ ।
भृगुश्चात्रिभरद्वाजवसिष्ठाद्या महर्षयः ॥

जिज्ञासवः परं ज्ञानं शिवशक्त्युन्मुखीकृताः ।
प्रणम्य चरणौ तस्य प्राहुरीशमुमापतिम् ॥ 5

ऋषयः—

भगवन् देवदेवेश पशुपाशविमोचक ।
सृष्टिस्थितितिरोभावलयानुग्रहकारक ॥

वियदादिमहाभूतावृत्तेस्साक्षात्प्रवर्तक ।
सहजानन्दसन्दोहसंविल्लक्षणात्मक ॥

परसंवित्स्वरूपिण्या शक्त्या परमया युत ।
दिग्देशकालनिर्मुक्त जगदाह्लादकारण ॥

वयं नियुक्ता देवेश त्वयेज्यायां शिवस्य तु ।
तदर्थं सारभूतं तु शास्त्रं शिवमुखोद्भवम् ॥

वक्तुमर्हसि देवेश भक्तानामनुकम्पया ।
इत्येवं ऋषिभिः पृष्टो भगवान् वृषभध्वजः ॥ 10

प्राह गम्भीरया वाचा स्फुरच्चन्द्रार्धशेखरः ।
साधु पृष्टं हि युष्माभिश्शृणुध्वं संशितव्रताः ॥

कामिकाख्यान्महातन्त्रादुद्धृतं शास्त्रमुत्तमम् ।
अवतीर्णमिदं मेरौ प्रणवाद्यवतारकैः ॥

क्रियाचर्यासमोपेतं योगज्ञानान्वितं परम् ।
इत्येवमुक्ता ऋषयः प्रणेमुर्दण्डवत्क्षितौ ॥

तेषामाज्ञां शिवो दत्वा प्राह तन्त्रमनुत्तमम् ।
आदावभूद् द्विधा ज्ञानमधिकारिविभेदतः ॥

परापरेण भेदेन पतिपश्वर्थदर्शकम् ।
शिवप्रकाशकं ज्ञानं शिवज्ञानं परं स्मृतम् ॥ 15

वेदाद्यमपरं ज्ञानं पशुपाशार्थदर्शकम् ।
यथा विलक्षणं चक्षुः क्षपायां नृविडाल्योः ॥

तथा विलक्षणं ज्ञानमेवमेतत्परापरम् ।
लौकिकं वैदिकं चैव तथाध्यात्मिकमेव च ॥

अतिमार्गं च मन्त्राख्यं तन्त्रमेतदनेकधा ।
सद्योवाममहाघोरपुरुषेशानमूर्तयः ॥

प्रत्येकं पञ्चवक्त्रास्स्युस्तैरुक्तं लौकिकादिकम् ।
पञ्चविंशतिभेदेन स्रोतोभेदः प्रकीर्तितः ॥

एष्वेवान्तर्गतं वक्तुं वाङ्मयं वस्तुवाचकम् ।
तेष्वेव मन्त्रतन्त्राख्यं सदाशिवमुखोद्गतम् ॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

सिद्धान्तं गारुडं वामं भूततन्त्रं च भैरवम् ।
ऊर्ध्वपूर्वकुबेराख्ययाम्यवक्त्राद्यथाक्रमम् ॥

ईशानवक्त्रादूर्ध्वस्थाज्ज्ञानं यत्कामिकादिकम् ।
दशाष्टादशभेदेन शिवरुद्रावतारकैः ॥

षट्षष्टिभिः क्रमेणैव कथितं तु शिवाज्ञया ।
तदेव युगभेदेन सद्योजातादिमूर्तिभिः ॥

प्रकाशितं चतुर्भेदं मूर्तिसंख्यावशेन तु ।
संख्यया गारुडं तद्वत् पूर्ववक्त्राद्विनिर्गतम् ॥

सावित्र्याद्यं च सिद्ध्यर्थमुक्तं तदवतारकैः ।
नयसूत्रादिभेदेन वामं वामाद्विनिर्गतम् ॥ 25

चतुर्विंशतिसंख्याकमवतीर्णं शिवाज्ञया ।
कौलादिविंशत्संख्यातं भूततन्त्रं तु सद्यतः ॥

द्विविधं तन्त्रमुद्भूतं भैरवं दक्षिणास्यतः ।
असिताङ्गादिभिर्भूमौ कथितं तदनेकधा ॥

प्रत्येकं तन्त्रभेदोक्तौ जायते ग्रन्थविस्तरः ।
अथ सिद्धान्ततन्त्राणामवतारो निगद्यते ॥

तनोति विपुलानर्थांस्तत्वमन्त्रसमाश्रितान् ।
त्राणं च कुरुते यस्मात्तन्त्रमित्यभिधीयते ॥

कामिकं प्रणवाख्यस्य परार्धग्रन्थसंख्यया ।
प्रणवात् त्रिकलः प्राप्तः त्रिकलाच्च ततो हरः ॥ 30

त्रयश्चैवोपभेदास्स्युर्वक्त्रारं भैरवोत्तरम् ।
नारसिंहं च विप्रेन्द्राः कथ्यते कामिकत्रयम् ॥

योगजं तु सुधाख्यस्य प्रोक्तं तल्लक्षसंख्यया ।
सुधाख्याद्वस्म संप्राप्तस्ततः प्राप्तो विभुः क्रमात् ॥

वीणाशिखोत्तरं तारं सन्तं सन्ततिरेव च ।
आत्मयोगं च पञ्चैते योगतन्त्रस्य भेदकाः ॥

चिन्त्यं सुदीप्तसंज्ञस्य प्रोक्तं शतसहस्रकैः ।
दीप्ताच्च गोपतिः प्राप्तस्ततः प्राप्ता तु चाम्बिका ॥

सुचिन्त्यं सुभगं वामं पापनाशं परोद्भवम् ।
अमृतं चिन्त्यतन्त्रस्य षड्विधं तु प्रकीर्तितम् ॥ 35

कारणं कारणाख्यस्य कोटिग्रन्थेन चोदितम् ।
कारणाच्छर्वरुद्रस्तु शर्वात्प्राप्तः प्रजापतिः ॥

कारणं पावनं दौर्गं माहेन्द्रं भीममेव च ।
ततस्तु मारणं द्वेष्टं सप्तधा कारणं तथा ॥

अजितं सुशिवाख्यस्य नियुतग्रन्थसंख्यया ।
सुशिवाख्याच्छिवः प्राप्तस्तच्छिवादच्युतस्ततः ॥

प्रभूतञ्च परोद्भूतं पार्वती पद्मसंहिता ।
चतुर्भेदमिदं तन्त्रं चास्मिन् तन्त्रे प्रकीर्तितम् ॥

दीप्तमीशस्य विख्यातं नियुतग्रन्थसंख्यया ।
ईशानमूर्तिस्संप्राप्तस्ततः प्राप्तो हुताशनः ॥ 40

अमेयं शब्दमाच्छाद्यमसंख्यमभितौजसम् ।
आनन्दं माधवोद्भूतमद्भुतं चाक्षतं तथा ॥

दीप्तं तु नवधा प्रोक्तं सूक्ष्मतन्त्रं निबोधत ।
सूक्ष्मं सूक्ष्मस्य संप्रोक्तं तद्ग्रन्थं पद्मसंख्यया ॥

सूक्ष्माद्वैश्रवणः प्राप्तस्तस्मात्प्राप्तः प्रभञ्जनः ।
तत्सूक्ष्ममेकभेदं स्यात्सूक्ष्ममित्यभिधीयते ॥

सहस्रं कालसंज्ञस्य प्रोक्तं वै शङ्खसंख्यया ।
कालाद्भीमस्ततः प्राप्तो भीमाद्धर्मो यथा तथा ॥

अतीतं मङ्गलं शुद्धमप्रमेयं तु जातिभाक् ।
प्रबुद्धं विबुधं हस्तमलङ्कारं सुबोधकम् ॥ 45

एते सहस्रतन्त्रस्य दशसंख्याः प्रकीर्तिताः ।
अंशुमानम्बुसंज्ञस्य पञ्चलक्षेण कीर्तितः ॥

अग्रश्चैवाम्बुसंज्ञाच्च अग्रात्प्राप्तस्ततो रविः ।
विद्यापुराणतन्त्रं च वासवं नीललोहितम् ॥

प्रकारणं भूततन्त्रमात्मालङ्कारमेव च ।
काश्यपं गौतमं चैन्द्रं ब्राह्मं वासिष्ठमेव च ॥

In Public domain. Digitization Muthulakshmi Research Academy

ऐशानं नामतः प्रोक्तमंशुमान् द्वादश स्मृतः ।
सुप्रभेदं महाशास्त्रं दशेशस्य प्रकीर्तितम् ॥

विघ्नेश्वरो दशेशाच्च शशी प्राप्तो गणेश्वरात् ।
त्रिकोटिसंख्यया प्रोक्तो भेदश्चात्र न विद्यते ॥ 50

क्रियादिज्ञानपर्यन्तं तन्त्रमत्रैव दृश्यते ।
शिवभेदमिति प्रोक्तो रुद्रभेदस्तयोच्यते ॥

रुद्रस्यानादिसंज्ञस्य विजयं तन्त्रमुत्तमम् ।
परमेशस्ततः प्राप्तस्त्रिकोटिग्रन्थसंख्यया ॥

विजयं चोद्भवं सौम्यमघोरं मृत्युनाशनम् ।
कुबेरं च महाघोरं विमलं विजयाष्टकम् ॥

निःश्वासं तु दशार्णस्य प्रोक्तं तत्कोटिसंख्यया ।
दशार्णात् शैलजा प्राप्ता चाष्टभेदेन भेदितं ॥

निःश्वासोत्तरनिःश्वासौ निःश्वासस्य मुखोदयम् ।
निःश्वासनयनं चैव तथा निःश्वासकारिका ॥ 55

घोरसंज्ञं यमाख्यं च गुह्यं चाप्येवमष्टधा ।
निधनस्य स्वयंभूतं त्रिकोट्यर्धेन कीर्तितम् ॥

निधनेशात्स्वयंभूतं श्रुतवान्नलिनोद्भवः ।
प्रजापतिमतं पद्मं स्वायम्भुवमिति त्रिधा ॥

आग्नेयं यच्च तद्वयोम्नो ग्रन्थसंख्यायुतत्रयात् ।
आग्नेयं तन्त्रमेकं तु तस्मात्प्राप्तो हुताशनः ॥

तेजस्तु वीरं संप्राप्तो नियुतग्रन्थसंख्यया ।
प्रजापतिस्ततः प्राप्तस्त्रयोदशविभेदकम् ॥

प्रस्तारं पुल्लमल्लञ्च (पुल्लममलं?) प्रबोधं बोधबोधकम् ।
अमोहं मोहसमयं हाकटं शाकटाधिकम् ॥ 60

हलं विलेखनं भद्रं वीरं वीरे त्रयोदश ।
रौरवं ब्राह्मणेशस्य चार्बुदाष्टकसंख्यया ॥

नन्दिकेशस्ततः प्राप्तः षड्भेदश्च विधीयते ।
कालघ्नं च कलातीतं रौरवं रौरवोत्तरम् ॥

महाकालमतं चैन्द्रं रौरवं षड्विधं मतम् ।
मकुटं तु शिवाख्यस्य शतसाहस्रसंख्यया ॥

महादेवस्ततः प्राप्तो भेदश्च द्विविधो भवेत् ।
मकुटोत्तरं च मकुटं द्विविधेन विधीयते ॥

सर्वात्मकस्य विमलं त्रिलक्षग्रन्थसंख्यया ।
वीरभद्रस्ततः प्राप्तो भेदाः षोडशसंख्यया ॥ 65

अनन्तं भोगमाक्रान्तं वृषपिङ्गं वृषोदरम् ।
वृषाद्भुतं सुदन्तं च रौद्रं भद्रविधं तथा ॥

अरेवतमतिक्रान्तमट्टहासमलङ्कृतम् ।
अर्चितं धारणं तन्त्रं विमलं षोडशैव तु ॥

चन्द्रज्ञानमनन्तस्य त्रिकोटिग्रन्थसंख्यया ।
बृहस्पतिस्ततः प्राप्तो भेदाश्चात्र चतुर्दश ॥

स्थिरं स्थाणुं महान्तं च वारुणं नन्दिकेश्वरम् ।
एकपादपुराणं च शङ्करं नीलरुद्रकम् ॥

शिवभद्रं कल्पभेदं श्रीमुखं शिवशासनम् ।
शिवशेखरमाख्यातं देव्या मतं तथैव च ॥ 70

चन्द्रज्ञानस्य तन्त्रस्य चतुर्दशविधो भवेत् ।
मुखबिम्बं प्रशान्तस्य शतसाहस्रसंख्यया ॥

दधीचिस्तु ततः प्राप्तो भेदाः पञ्चदशैव तु ।
चतुर्मुखमलायोगं संस्तोभं प्रतिबिम्बकम् ॥

आत्मालङ्कारवाय्ये तौटिकं तुटिनीरकम् ।
कलात्ययं तुलायोगं कुट्टिमं पट्टशेखरम् ॥

महाविद्या महासौरं बिम्बं पञ्चदशैव तु ।
प्रोद्गीतं शूलिनः प्रोक्तं लक्षत्रितयसंख्ययां ॥

कवचाख्यस्ततः प्राप्तो भेदाः षोडशसंख्यया ।
कवचं चैव वाराहं पिङ्गलामतमेव च ॥ 75

पाशबन्धं दण्डधरमङ्कुशं च धनुर्धरम् ।
शिवज्ञानं च विज्ञानं श्रीकालज्ञानमेव च ॥

In Public domain. Digitization Muthulakshmi Research Academy

आयुर्वेदं धनुर्वेदं सर्पदंष्ट्रीविभेदनम् ।
गीतं भरतमातोद्यं प्रोद्गीतं षोडशैव तु ॥

ललितं चालयेशस्य प्रोक्तमष्टसहस्रकम् ।
आलयाल्लालितः (भैरवः?) प्राप्तो ललितं ललितोत्तरम् ॥

कौमारं चैव तद्भेदं त्रिविधं परिकीर्तितम् ।
विन्दोस्सिद्धमिदं तन्त्रं कोटिकोटयर्धसंख्यया ॥

विन्दु (संज्ञात्तु?) सिद्धाख्यं प्राप्तश्चण्डेश्वरः परः ।
सारोत्तरमथान्यत्तु औशनोत्तरमेव च ॥ 80

शालाभेदं शशीखण्डं सिद्धं तन्त्रं चतुर्विधम् ।
सन्तानं शिवनिष्ठस्य षट् सहस्रं तु संख्यया ॥

असंवायस्ततः प्राप्तो भेदस्सप्तविधो भवेत् ।
लिङ्गाध्यक्षं सुराध्यक्षं शङ्करं त्वमलेश्वरम् ॥

असंख्यमनिलं द्वन्द्वं सन्तानं सप्तधेरितम् ।
सोमदेवस्य शर्वोक्तं द्विलक्षेणैव संख्यया ॥

नृसिंहः प्राप्तवान् सोमाद्भेदः पञ्चविधो भवेत् ।
शिवधर्मोत्तरं चैव वायुप्रोक्तं तथैव च ॥

दिव्यप्रोक्तमथैशानं शर्वोद्गीतं विधीयते ।
श्रीदेव्यास्तु समाख्यातं पारमेश्वरमुत्तमम् ॥ 85

ग्रन्थद्वादशलक्षं तु सप्तधा प्रसृतं तु तत् ।
उशनोमुनिसंप्राप्तः श्रीदेव्याश्च यथाक्रमात् ॥

मतङ्गं यक्षिणीपद्मं पारमेश्वरमेव च ।
पुष्करं सुप्रयोगं च हंसं सामान्यमेव हि ॥

किरणं देवविभवे कोटिपञ्चकसंख्यया ।
संवर्तकस्ततः प्राप्तो भेदास्तु नवसंख्यया ॥

गारुडं नैर्ऋतं नीलं रूक्षं भानुकधेनुके ।
प्रबुद्धं बुद्धकालाख्ये नवधा किरणो भवेत् ॥

शिवस्य वातुलं प्रोक्तं ग्रन्थाः शतसहस्रकम् ।
महाकालस्ततः प्राप्तो भेदा वै द्वादशैव तु ॥ 90

वातुलं चोत्तरं चैव कालज्ञानं प्ररोहितम् ।
सर्वं धर्मात्मकं श्रेष्ठं नित्यं शुद्धं महाननम् ॥

विश्वं विश्वात्मकं चैव वातुले द्वादश स्मृताः ।
अष्टाविंशतितन्त्राणां मूलभेदाः प्रकीर्तिताः ॥

कामिकं पादयुग्मं स्याद्योगजं गुल्फमेव च ।
चिन्त्यं पादाङ्गुलिः प्रोक्तः कारणं जङ्घिका भवेत् ॥

अजितं जानुदेशं स्याद्दीप्तमूरुप्रदेशकम् ।
सूक्ष्मन्तु गुह्यमेवं स्यात्सहस्रं कटिदेशकम् ॥

अंशुमान् स्यात् पृष्ठतलं सुप्रभेदं तु नाभिकम् ।
विजयं कुक्षिदेशं स्यान्निःश्वासं हृदयं भवेत् ॥ 95

स्वायंभुवं स्तनौ द्वौ तु अनलं नेत्रमेव च ।
वीरं कण्ठप्रदेशस्तु रौरवं श्रोत्रमेव च ॥

मकुटं माकुटं तन्त्रमङ्गप्रत्यङ्गमेव च ।
बाहू तु विमलं प्रोक्तं चन्द्रज्ञानमुरस्स्थलम् ॥

बिम्बतन्त्रं सुवदनं प्रोद्गीतं रसना भवेत् ।
ललितं स्यात्कपोलं तु सिद्धं चैव ललाटकम् ॥

सन्तानं कुण्डलं विद्याच्छर्वोक्तमुपवीतकम् ।
पारमेशेन हारं तु किरणं रत्नभूषणम् ॥

वातुलं वसनं प्रोक्तं शिवधर्मं त्रिपुण्ड्रके ।
कल्पश्चैव तु संयोगे शिवधर्मानुलेपने ॥ 100

बिम्बं पुष्पे च माल्ये च सिद्धान्तेन निवेदितम् ।
तन्त्रात्मकशरीरेण मन्त्रमूर्तिमयेन तु ॥

एतेषामुपभेदैश्च सादाख्यं मूर्तिमत् स्थितम् ।
शिवरुद्रात्मकं तन्त्रमष्टाविंशतिसंख्यकम् ॥

चिन्तामणिरिव भ्राजि चैकधा बहुधा दिशेत् ।
यद्यप्येको भवेद्वक्ता श्रोतृभेदादनेकधा ॥

कर्षणादिप्रतिष्ठान्तं मूलेनैव समाचरेत् ।
कृतश्चेदुपभेदेन कर्ता भर्ता विनश्यति ॥

In Public domain. Digitization Muthulakshmi Research Academy

केवलं यजनं प्रोक्तमुपमेदैर्विशेषतः ।
प्रतिष्ठाद्यं तु मूलैश्चेत् अष्टाविंशतिभिर्वरम् ॥ 105

येन तन्त्रेण चारब्धं कर्षणाद्यर्चनान्तकम् ।
तेन सर्वं प्रकर्तव्यं न कुर्यादन्यतन्त्रतः ॥

कारयेदन्यतन्त्रेण नोक्तं चेत्तु विशेषतः ।
उक्तानि प्रतिषिद्धानि पुनस्संभाषितानि च ॥

सापेक्षनिरपेक्षाणि शिववाक्यान्यनेकधा ।
चतुष्पादयुतान्येव भुक्तिमुक्त्यर्थसाधनम् ॥

एतान्येवाथ श्रुत्वा तु देवैर्मुनिवरादिभिः ।
संक्षेपतोऽपि कथितं सर्वेषामनुकम्पया ॥

एषामध्ययनं कार्यं शिवविप्रैर्गुरुक्रमात् ।
अध्यापनं च कर्तव्यं न कार्यमितरैर्नरैः ॥ 110

दीक्षाविहीनविप्राद्यास्त्रिवर्णाश्शूद्रजातयः ।
सवर्णाद्यनुलोमाश्च शिल्पिनः कारुकादयः ॥

पठन्ति शिवशास्त्रञ्चेत्तत्पापान्नृपराष्ट्रयोः ।
अचिरेण विनाशः स्यात्तस्माद्राजा निवारयेत् ॥

शिवसिद्धान्ततन्त्रेण प्रारब्धं कर्षणादिकम् ।
न कुर्यादन्यशास्त्रेण कुर्याच्चेत्तन्त्रसंकरः ॥

तन्त्रसंकरदोषेण राजा राष्ट्रं च नश्यति ।
गारुडं भूततन्त्रं च भैरवं वामतन्त्रकम् ॥

कापालं पाञ्चरात्रं च लाकुलं कुलशास्त्रकम् ।
तन्त्रं पाशुपतं चान्यत् पुराणं धर्मशास्त्रकम् ॥ 115

इतिहासं षडङ्गं च ऋग्यजुस्सामसंज्ञकम् ।
अथर्वणं तथा बौद्धमार्हतं मतमेव च ॥

ऊर्ध्वस्रोतोऽक्षपाच्छास्त्रादपरं तदनुक्रमात् ।
कामिकादि शिवज्ञानं मूर्ध्वा भगवतस्सदा ॥

इतराणि महेशस्य हृत्कण्ठाद्यङ्गकानि वै ।
पूर्वपक्षतया तानि कथितानीह शम्भुना ॥

हेयोपादेयवस्तूनां निर्णये परमार्थतः ।
तत्सर्वमधरीकृत्य शैवसिद्धान्त ईरितः ॥

सिद्धान्तशास्त्रनिष्ठैश्च शिवविप्रैर्यथाक्रमम् ।
शास्त्रान्तरैस्तु संस्थाप्य लिङ्गं तदुभयार्थकम् ॥ 120

पूजनीयं नृपग्रामयजमानाभिवृद्धये ।
शैवस्सर्वाधिकारी स्यात्स्वकीये च परत्र च ॥

शैवास्सर्वेषु कुर्वन्ति ये गृहस्था द्विजोत्तमाः ।
यामले मातृतन्त्रे च कापाले पाञ्चरात्रके ॥

बौद्धे चार्हमते चैव लाकुले वैदिकेऽपि च ।
अन्येष्वपि च मार्गेषु तत्तच्छास्त्रैः स्वशास्त्रतः ॥

शैवाः कुर्वन्ति दीक्षाद्यं तल्लिङ्गस्थापनादिकम् ।
मुख्यत्वादिह शैवस्य मुखमाहात्म्यतोऽपि च ॥

अधिकारोऽस्ति सर्वत्र नान्येषां शिवदर्शने ।
तस्मात्परार्थमात्मार्थं स्थापनं यजनं तथा ॥ 125

शिवविप्रेण कर्तव्यमन्येषां स्वार्थमेव हि ।
परार्थमपि कुर्याच्चेल्लोपेन नृपतेस्तथा ॥

तद्राष्ट्रस्य च नाशः स्यादचिरेण न संशयः ।

॥ इति कामिकाख्ये महातन्त्रे क्रियापादे तन्त्रावतारपटलः प्रथमः ॥

—0—

In Public domain. Digitization Muthulakshmi Research Academy